दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लचतुर्थी
ज्येष्ठ 06 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-207 | 1 | मई 20, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 हिमाचलप्रदेशः- आकाशमार्गेण प्राप्स्यन्ति रोगिणां परीक्षा- विवरणाणि प्रतिदर्शाः (सैम्पल) च; ड्रोननीतेः प्रवर्तनाय निर्देशः

4 ओस्लो-नगरे प्रेस-स्वातन्त्र्यविषये तीक्ष्णः वादविवादः, नॉर्वे-देशस्य महिला-पत्रकारस्य प्रश्नः, विदेशमन्त्रालयेन उत्तरं दत्त्वा मुखं कीलितम्

5 अधिकमाससमीक्षा (मलमासविशेषः)

## भारत-नार्डिक शिखरसम्मेलनम् नार्वे-देशस्य राजधान्यां ओस्लो-नगरे समारब्धम्



**हिमसंस्कृतवार्ता।** तृतीयं भारत-नार्डिक शिखरसम्मेलनम् नार्वे-देशस्य राजधान्यां ओस्लो-नगरे समारब्धम्। प्रधानमन्त्रिणा नरेन्द्रमोदिना सह नार्वे, स्वीडन, आइसलैंड, फिन्लैण्ड, डेन्मार्क इत्येतेषां समकक्षिभिः सह अस्मिन् शिखरसम्मेलने भागं स्वीकृतम्। द्वाविंशत्यधिक द्विसहस्रतमे वर्षे डेन्मार्क-देशस्य कोपेनहेगन-नगरे आयोजितस्य पूर्व-शिखरसम्मेलनानन्तरं भारत-नार्डिक देशानां मध्ये क्षेत्रीय-सहकारं सुदृढीकरणम्। अस्य सम्मेलनस्य उद्देश्यम् अस्ति। तन्त्रज्ञानं नवान्वेषणं च, सुस्थिरता, पुनर्नवीकरणीय ऊर्जा, डिजिटलीकरणं च अस्य सम्मेलनस्य प्रमुखानि क्षेत्राणि सन्ति। व्यापार-आर्थिक-सहभागित्व-सन्धिना, टी. ई. पी. ए. इत्यनेन सह, अधुना प्रवृत्तेन, शिखरसम्मेलनेन भारत-नार्डिक क्षेत्राणां मध्ये व्यापार-निवेश-सम्बन्धाः अपि सुदृढाः भविष्यन्ति इति अपेक्षा अस्ति। नार्डिक समूहेन सह भारतस्य वैपाक्षिकव्यापारः सम्प्रति प्रायः एकोनविंशति बिलियन डालर-मितम् अस्ति। अनेन शिखरसम्मेलनेन भारत-नार्डिक-देशयोः मध्ये बहु-पक्षीय-सहकारस्य विस्तारः भविष्यति तथा च परस्पर-हितस्य क्षेत्रीय-वैश्विक-विषयेषु चर्चायाः अवसरः प्राप्यते इत्यपि अपेक्षा अस्ति। शिखरसम्मेलनात् पूर्व प्रधानमन्त्री मोदी आइसलैण्ड-देशस्य प्रधानमन्त्रिणा, फिनलैण्ड-देशस्य प्रधानमन्त्रिणा, डेन्मार्क-देशस्य प्रधानमन्त्रिणा च सह द्वैपाक्षिक मेलनं कृतवान् । प्रधानमन्त्री मोदी यू. ए. ई., नीदरलैन्ड्स, स्वीडन देशानां भ्रमणं समाप्य नार्वे-देशं सम्प्राप्तवान्। सः क्राउन प्रिन्स हकोन तथा नार्वे-देशस्य प्रधानमन्त्रिणा जोनास गहर स्टोर इत्युभाभ्यां सह भारत-नार्वे व्यापार-अनुसन्धान-शिखरसम्मेलने भागं भाजितवान् । वाणिज्य-अनुसन्धान-समुदायं सम्बोधयन्, प्रधानमन्त्री श्रीमोदी, व्यापार-आर्थिक-सहभागित्व-सन्धेः प्रभावात् परं द्वैपाक्षिक-व्यापारस्य निवेशस्य च वृद्धः प्रशंसाम् अकरोत्। सः अधोरेखितवान् यत् उभयोः पक्षयोः हितधारकाः शतं बिलियन् यू. एस्. डालर् इत्यस्य निवेशलक्ष्यं साधयितुं प्रयत्नान् कुर्युः, परिणामतः भारते दशलक्षाणि यावत् वृत्त्यवसराणां सृजनं च करणीयम्। प्रधानमन्त्री श्रीमोदी स्वस्य पञ्चराष्ट्राणां यात्रायाः पञ्चमान्तिमे चरणे च अद्य इटलीदेशं गमिष्यति। भारत-स्वीडन्-देशौ वैश्विक अनिश्चिततायाः क्षणे सहकारः सहभागी-समृद्धः, सुस्थिरस्य भविष्यस्य च मार्गम् निर्धारणाय अवधानं दत्तवन्तौ। प्रधानमन्त्रिणा नरेन्द्रमोदिना तस्य स्वीडन्-देशस्य समकक्षीयेण उल्फ क्रिस्टर्सन इत्यनेन च लिखिते लेखे वैश्विक-अनिश्चिततायाः, ऊर्जा असुरक्षायाः, आर्थिकविभाजनस्य च समये, विश्वं एकाकीभूय कार्य कर्तुं अन्ताराष्ट्रियसहभागित्वं सुदृढं कर्तुं वा चयनं कर्तव्यम् इति अवधानं दत्तवन्तौ। राष्ट्रिय दैनिक पत्रिकायां प्रकाशिते लेखे, उभौ प्रधानमन्त्रौ उक्तवन्तौ यत् संयुक्तराष्ट्रसङ्घः स्वस्य अशीतितमं वार्षिकोत्सवम् आचरति, अतः अन्ताराष्ट्रियसहयोगस्य बहुपक्षवादस्य च मूल्यं इतोऽपि स्पष्टम् अभवत् ।




## उन्मत्तानां, असाध्यरोगिणाञ्च मार्गभ्रष्टशुनकानां कृते प्रथमवारं यूथेनेशिया माध्यमेन मृत्योः अनुमतिः प्रदत्ता



हिमसंस्कृतवार्ताः। सर्वोच्चन्यायालयेन, मानवजीवनस्य सार्वजनिकसुरक्षायाः च आवश्यकताम् उल्लिखन्, उन्मत्तानां, असाध्यरोगिणां, अथवा प्रत्यक्षतया अपायकारिणां मार्गभ्रष्टशुनकानां कृते प्रथमवारं यूथेनेशिया माध्यमेन मृत्योः अनुमतिः प्रदत्ता । न्यायाधीशः विक्रम नाथः, न्यायाधीशः सन्दीप मेहता, न्यायाधीशः एन्. वी. अञ्जारिया इत्येतेषां पीठेन सम्पूर्ण देशे वर्धमानानां स्वामिविरहितानां शुनकानां संख्यां निवारयितुं निर्देशाः प्रादत्ता। न्यायपीठेन उक्तं यत् यत्र यत्र स्वामिविरहितानां शुनकानां सङ्ख्या चिन्ताजनक-स्तरम् अवाप्नोत् तथा च यत्र पुनः पुनः शुनकानां दंशः वा आक्रामक-आक्रमणानि जनसुरक्षायै विभीषिकां जनयन्ति तत्र नगरपालिकाः मृत्योः आश्रयं स्वीकर्तुं शक्नुवन्ति । गतवर्षस्य जुलाई-मासस्य अष्टाविंशति दिनाङ्के आरब्धे प्रकरणे अयं आदेशः प्रसारमाध्यमानां प्रतिवेदनेषु, विशेषतः राष्ट्रिय-राजधान्यां बालानां मध्ये, स्वामिविरहितानां शुनकानां दंशनस्य, रेबीज इति रोगस्य च घटनाः प्रकाशमानाः आसन्। एतदतिरिच्य, सर्वोच्चन्यायालयेन स्वामिविरहितानां शुनकानां स्थानान्तरणस्य प्रजननावरोधस्य च विषये पूर्वतनस्य आदेशस्य पुनरावेदनस्य याचिका निरस्तिकृता, सः अवदत् यत् गौरवपूर्वकं जीवनस्य अधिकारे शुनकानां दंशनस्य आक्रमणात् हानिकरं भयं विना स्वतन्त्रतया भ्रमणस्य अधिकारः अन्तर्भवतीति ।

## उद्यम-सर्वकारयोः मध्ये व्यापारे सुगमतां वर्धयितुम् आह्वानम् अकरोत् केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष गोयलः

केन्द्रीय-वाणिज्य-उद्योग-मन्त्री पियूष गोयलः उद्यम-सर्वकारयोः मध्ये व्यापारे सुगमतां वर्धयितुं, भारते प्रतिस्पर्धात्मकतां वर्धयितुं, विकसित-भारतम् प्रति देशस्य यात्रां च त्वरितं कर्तुं प्रगाढसहयोगस्य आह्वानम् अकरोत्। नव दिल्ल्यां षड्विंशत्यधिक विद्वसहस्रतम वर्षस्य भारत-व्यापार-परिष्कार-शिखरसम्मेलने मन्त्री भाषमाणः आसीत् । श्रीगोयलः अवदत् यत् वर्तमान-वैश्विक परिस्थितिः भू-राजनैतिक-अनिश्चितताः च भारतस्य कृते व्यापार-प्रक्रियां सुदृढं कर्तु, द्रुततर-परिष्कारान् स्वीकर्तु, महत्तर-स्थितिस्थापकतायाः निर्माणं कर्तु, आपूर्तिशृङ्खलाः सुदृढां कर्तुं च अवसरत्वेन द्रष्टव्यम्।

## सुभाषितम्

**परवाच्येषु निपुणः,**
**सर्वो भवति सर्वदा।**
**आत्मवाच्यं न जानाति,**
**जानन्नपि च गुह्यते।।**

दूसरों की कमियों की आलोचना करने में सभी लोग सदैव निपुण होते हैं, परन्तु स्वयं अपनी कमियों को या तो नहीं जानते हैं और यदि जानते भी हों तो गुप्त रखते हैं।

## रूस देशस्य राष्ट्रपतिः व्लादिमिर पुतिनः चीनदेशस्य राष्ट्रपतिना शीजिनपिङ्ग वर्येण सह मेलनं करिष्यति

रूस देशस्य राष्ट्रपतिः व्लादिमिर पुतिनः चीनदेशस्य राष्ट्रपतिना शीजिनपिंग-वर्येण सह मेलनं करिष्यति। क्रेमलिन इत्यस्य अनुसारं, उभौ नेतारौ आर्थिकसहयोगस्य विषये, प्रमुखेषु प्रादेशिक-वैश्विक-विषयेषु च चर्चा करिष्यतः। एषा यात्रा चीन-रशिया मैत्री-सन्धेः पञ्चविंशति वर्षाणाम् उपलक्ष्ये आचर्यते। एषा वार्ता तदा अभवत् यदा वैश्विक-भूराजनैतिक-संघर्षस्य मध्ये चीनदेशः अमेरिकादेशेन रूसदेशेन च सह स्वस्य सम्बन्धान् सन्तोलयति । युक्रेन् द्वन्द्वस्य विषये पाश्चात्त्य-प्रतिबन्धाणाम् अनन्तरम् अपि चीनदेशः रूसदेशस्य बृहत्तमः वाणिज्यिक सहभागिः, रूसदेशस्य तैल-प्राकृतिकेन्धनस्य प्रमुखः क्रेता च अस्ति ।

# हिमाचलप्रदेशः- आकाशमार्गेण प्राप्स्यन्ति रोगिणां परीक्षा-विवरणाणि प्रतिदर्शाः (सैम्पल) च; ड्रोननीतेः प्रवर्तनाय निर्देशः



**हिमसंस्कृतवार्ताः-शिमला।**
हिमाचलप्रदेशसर्वकारः स्वास्थ्यसेवाः आधुनिक- तकनीकविद्याया सह संयोजितुं महत् कदमं स्थापयितुं गच्छति। प्रदेशस्य दूरवर्तिभ्यः दुर्गमक्षेत्रेभ्यः च रोगिणां प्रतिदर्शाः ड्रोन-माध्यमेन अधुना चिकित्सामहाविद्यालयान् मण्डलयोग्य-चिकित्सालयान् च प्रति प्रापयिष्यन्ते। परीक्षणानन्तरं विवरणाणि सम्बद्धस्वास्थ्यकेन्द्रेभ्यः अन्तर्जालमाध्यमेन प्रेषयिष्यन्ते। सर्वकारेण स्वास्थ्यविभागः ड्रोननीतिं प्रवर्त्तयितुं कथितः। प्रदेशस्य जनजातीय-कठिनभौगोलिकक्षेत्रेषु यथा- 'बड़ा भंगाल', किन्नौर, लाहौल-स्पीति, मण्डीमण्डलस्य च सुदूरभागेषु स्वास्थ्यसेवाः सुदृढाः कर्तुम् एषः प्रयासः क्रियते। हिंमाचलप्रदेशे द्रोणयानस्य परीक्षणं सफलं जातम् अस्ति।

### सुदूरस्वास्थ्यकेन्द्रेषु प्राप्स्यते महत् लाभः-

हिमाचलस्य सुदूरभागेषु एतादृशानि स्वास्थ्यकेन्द्राणि सन्ति, यत्र रोगिणां प्रतिदर्शाणां परीक्षणं न भवति। प्रतिदर्शाः लोकयानैः परीक्षणार्थं मण्डलचिकित्सालयस्य प्रयोगशालां प्रति प्रेष्यन्ते। तस्मात् कारणात् त्रयाणां चतुर्णां वा दिनानां पश्चात् विवरणं प्राप्यते। द्रोणयानेन प्रतिदर्शाणाम् आनयनात् परं तस्मिन्नेव दिने परीक्षणं भविष्यति, विवरणं च अन्तर्जालमाध्यमेन चिकित्सकान् प्रति प्रेषयिष्यते, येन रोगिणाम् उपचारे विलम्बः न भविष्यति।

## चिकित्सालयाः शीघ्रं प्राप्स्यन्ति परीक्षणविवरणम्-

अस्यां योजनायां क्षेत्रीयचिकित्सालयेभ्यः स्वास्थ्यसंस्थानेभ्यः च रक्त-मूत्र-अन्यपरीक्षणानां प्रतिदर्शाः ड्रोनमाध्यमेन चिकित्सामहाविद्यालयेषु मण्डलचिकित्सालयेषु च प्रेषयिष्यन्ते। स्वास्थ्यविभागस्य अधिकारिणाम् अनुसारं बहुषु दुर्गमक्षेत्रेषु रोगिभिः लघुपरीक्षणार्थमपि सुदीर्घा यात्रा करणीया भवति। वर्षा-ऋतौ हिमपाते च एषा समस्या अपि अधिका वर्धते। द्रोणसेवायां प्रारब्धायां सत्यां चिकित्सालयाः विवरणं शीघ्रं प्राप्स्यन्ति, रोगिभ्यः च अकारणम् चिकित्सामहाविद्यालयानां गमनागमनं न कर्तव्यं भविष्यन्ति।

## एते लाभः भविष्यन्ति-

ड्रोन-तकनीकविद्यायाः प्रयोगः स्वास्थ्यविभागाय दुर्गमक्षेत्रवासीनां कृते च वरदानसदृशः भविष्यति। प्रदेशस्य अधिकांशचिकित्सालयेषु कर्मचारिणां महती न्यूनता वर्तते। चिकित्सकैः सह अन्याः स्वास्थ्यकर्मचारिणः अपि न्यूनाः सन्ति। प्रदेशस्य दूरवर्ति- ग्रामीणक्षेत्राणां जनाः स्वकीयानां लघुव्याधीनाम् उपचारार्थमपि बृहत्- चिकित्सालयान् प्रति गच्छन्ति। ईदृश्यां स्थितौ द्रोणस्य साहाय्येन दुर्गमक्षेत्रेषु जनानां कृते औषधानि उपलप्स्यन्ते, प्रतिदर्शाणां सङ्ग्रहणं च भवितुं शक्ष्यति।

## एन. एच. एम., आई. टी. निदेशकाः च किमवदन्?

*सुदूरस्वास्थ्यकेन्द्रेभ्यः रोगिणां प्रतिदर्शाणां नयनाय ड्रोन-नीतिः सज्जा अस्ति। स्वास्थ्यविभागः एतां नीतिं प्रवर्तयितुं निर्देशितः। सर्वकारस्य एतेन निर्णयेन रोगिणः लाभान्विताः भविष्यन्ति।"*
-निपुण जिन्दलः, निदेशकः (I.T.)

*ड्रोन-नीतिः सज्जा वर्तते, एषा सम्पाद्यमाना अस्ति। सर्वकारस्य एतेन निर्णयेन रोगिणः साहाय्यं प्राप्स्यन्ति। रोगिणां प्रतिदर्शाणां विवरणाणि सायं यावत् अन्तर्जालपुटे (Online) उपलब्धानी भवितुं शक्ष्यन्ति।"*
-प्रदीप कुमारः, निदेशकः (N.H.M.)

### पाङ्गी-क्षेत्रस्य जनाः अवदन्-ड्रोनप्रेषणस्य निर्णयः प्रशंसनीयः

चम्बामण्डलस्य पाङ्गी-क्षेत्रस्य निवासिनौ सुरेन्द्र शर्मा, वीरेन्द्र राणा च, होली-क्षेत्रस्य निवासी सुरेश कुमारः तथा च भरमौर-क्षेत्रस्य बिमला देवी च अवदन् यत् सर्वकारस्य अनेन प्रयासेन रोगिणां कष्टनिवारणम् भविष्यति। अधुना प्रतिदर्शाणां विवरणं पञ्चानां षण्णां वा दिनानां पश्चात् आयाति। स्वास्थ्यविभागेन प्रतिदर्शसङ्ग्रहणाय द्रोणप्रेषणस्य एषः प्रयासः अतीव प्रशंसनीयः अस्ति। रोगिणां परीक्षण-विवरणं सायं यावत् प्राप्स्यति, येन उपचारे विलम्बः न भवितुं शक्नोति। अधुना लघुव्याधीनाम् उपचारार्थमपि मण्डलचिकित्सालयं प्रति गन्तव्यं भवति (यस्मात् मुक्तिः मिलिष्यति)।







# HP WEATHER- उष्णतया समतलप्रदेशैः सह पर्वतप्रदेशा अपि तप्ताः; ऊनायाम् अधिकतमं तापमानं ४३.४ डिग्री-सेल्सियस् पर्यन्तं प्राप्तम्

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे चतुर्दिनपर्यन्तं निरन्तरं स्वच्छर्तौ स्थिते तापमानस्य वृद्धिः अभवत्। समतलजनपदेभ्यः आरभ्य पर्वतीयप्रदेशेषु अपि जनानां स्वेदः प्रवर्तितः। गतचतुर्विंशतिघण्टानां अवधौ केषुचित् केन्द्रेषु अधिकतम-तापमाने २ तः ७ डिग्री-सेल्सियस् पर्यन्तम् उल्लेखनीया वृद्धिः अभवत्। अधिकांशकेन्द्रेषु अधिकतम-तापमानं सामान्यतया अपेक्षया अधिकं अभवत्। मङ्गलवासरे ऊनानगरे अधिकतमं तापमानं ४३.४ डिग्री- सेल्सियस पर्यन्तं प्राप्तम्। यदा च नेरी-क्षेत्रे ४१.२ डिग्री- सेल्सियस तापमानम् अभिलेखितम्। ऋतुविज्ञानविभागेन २१ मई पर्यन्तं केषुचित् स्थानेषु उष्णवातस्य (लू) सम्भावनां दृष्ट्वा पीत-सतर्कता (येलो- अलर्ट) निर्गता।अपरतः ऊनाजिलान्तर्गते जोल-उपतहसील-क्षेत्रे एतेषु दिनेषु वर्धमान-उष्णतायाः कारणेन कृषकाः मक्की-शस्यस्य संरक्षणार्थं क्षेत्रेषु दिनरात्रं परिश्रमं कुर्वन्तः दृश्यन्ते। प्रदेशे सम्यक् वर्षायाः अभावात् क्षेत्राणां मृदा शुष्का भवितुम् आरब्धा, येन कृषकाणां चिन्ता वर्धिता। एतादृश्यां परिस्थितौ कृषकाः प्रातःकाले शीघ्रं सायंकाले च क्षेत्रेषु सिंचनं कृत्वा मक्की-शस्ये आर्द्रतां धारयितुं प्रयत्नशीलाः सन्ति। ग्रामेषु बहवः कृषकाः ट्यूबवेल्, मोटर् तथा पाइप-माध्यमेन क्षेत्रेषु जलं प्रापयन्ति। केचन कृषकाः ट्रैक्टर-चालित-पम्पानां साहाय्येन सिंचनकार्यं कुर्वन्ति, यथा तीव्र-सूर्यतापेन फसलः प्रभावितो न भवेत्।

## उष्णतायाः उपशमस्य सम्भावना; केषुचित् भागेषु निरन्तरं सप्ताहपर्यन्तम् ऋतुः प्रतिकूलः

ऋतुविज्ञानकेन्द्र- शिमलायाः अनुसारं प्रदेशस्य केषुचित् भागेषु १९ मई तः २५ मई पर्यन्तं वर्षायाः सम्भावना वर्तते। २२ मई दिवसे समतल, मध्य तथा उच्च-पर्वतीय-अनेक-प्रदेशेषु वर्षा भवितुम् अर्हति। अपरं आगामि २-३ दिनेषु राज्यस्य बहुषु भागेषु न्यूनतम तथा अधिकतम तापमाने क्रमशः २-३ डिग्री-पर्यन्तं वृद्धेः सम्भावना अस्ति। ततः अनन्तरं वर्षायाः स्थितौ अनेकप्रदेशेषु तापमानस्य पतनस्य अपि सम्भावना वर्तते। मङ्गलवासरे शिमलानगरे तीव्रसूर्यप्रकाशेन सह मन्द-मेघावरणमपि दृष्टम्।

# मण्डी-प्रौद्योगिकी-संस्थाने भारतस्य नूतनः मङ्गलयोद्धा 'मौर्यः' सज्जः




**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।** मण्डी-जनपदस्य कमान्दे स्थिते भारतीय-प्रौद्योगिकी- संस्थाने छात्रैः पुनरेकवारं अन्तरिक्ष- प्रौद्योगिकीक्षेत्रे नूतना उपलब्धिः लिखिता। चतुर्षु वर्षेषु कृतपरिश्रमैः, विफलताभ्यः प्राप्तशिक्षया, निरन्तरपरिष्कारेण सह अद्यतनः "मौर्यः" नामकः मार्स- रोवरः प्रक्षेपणाय सज्जः अभवत्। अयं मार्स-रोवरः मङ्गलग्रहस्य पृष्ठभागे सञ्चरणयोग्यः निर्मितः अस्ति। अस्मिन् आधुनिकप्रौद्योगिकी, मृत्तिका- विश्लेषणक्षमता, पृथिव्यां दत्तांशप्रेषणसामर्थ्यं च विकसितम् अस्ति। अयं मङ्गलग्रहे जीवनसम्भावनानाम् अन्वेषणाय अपि समर्थः निर्मितः अस्ति। भारतस्य अयं नूतनः "मङ्गलयोद्धा" मण्डी-स्थिते आईआईटी-संस्थाने सिद्धः अस्ति, भारतीय-अन्तरिक्ष-अनुसन्धान-सङ्घटनेन 2030 पर्यन्तं च मङ्गलयान-प्रेषण-परियोजनायां कार्यं क्रियते। अस्मिन्नेव याने मण्डी-आईआईटी-संस्थाने निर्मितः अयं रोबोटः प्रेषितुं शक्यते। अयं रोवरः अधुना अमेरिकादेशे "यूनिवर्सिटी रोवर चैलेंज" (यूआरसी) इत्यस्य परीक्षणप्रक्रियायां वर्तते।

मण्डी-आईआईटी, रोबोटिक्स-क्लबस्य पञ्चाशत्सदस्ययुक्तया बहुविषयक-समित्या "मौर्य" इत्यस्य स्वप्नं साकारकृतम्। रोबोटनिर्माण-समितौ यान्त्रिक- वैद्युत-सॉफ्टवेयर-, जीवनविज्ञान- विषयेषु अध्ययनरताः छात्राः सम्मिलिताः आसन्। अस्मिन् रोबोटे अस्मिन् वारे साहसिक-नवाचारस्य स्थाने विश्वसनीयता तथा दोषसहनक्षमतायां विशेषं बलं दत्तम् अस्ति। अस्य परियोजनायाः नेतृत्वं सुखवंशजैनमहोदयः करोति।तस्य दलं पूर्वसंस्करणेषु विद्यमानाः न्यूनताः निराकृत्य दृढः, लघुभारयुक्तः तथा बुद्धिमान् रोवरः निर्मितवान्। "मौर्य" रोबोटे गतिशीलता-प्रणालीसहितं पूर्वस्य षट्चक्रयुक्त-प्रोटोटाइपस्य स्थाने अधुना चतुश्चक्रयुक्तं "रॉकर-डिफरेन्शियल- सस्पेन्शन" युक्तं स्वरूपं निर्मितम्। अस्य भारः अपि अष्टकिलोग्रामपर्यन्तं न्यूनः कृतः तथा ऊर्जा-दक्षता वर्धिता। नूतनचक्र-रचनायां त्रिकोणीय- थ्रेड- आकृत्या उत्तमं कर्षणबलम् अवरोध-उत्तीर्णता च प्राप्ता। "रॉकर-जॉइण्ट" इत्यस्य परिष्कारेण तनावः न्यूनीकृतः, येन टॉर्क-आवश्यकता अपि न्यूना जाता।रोबोटिक-भुजायाः कृते षड्-स्वातन्त्र्य-अंशयुक्ता उन्नता भुजा, "फोर-बार-मैकेनिज्म", "नोबल- मैकेनिज्म" तथा विद्युत्चुम्बकीय-लॉकिंग-प्रणाली प्रदत्ता अस्ति। गुरुभार-वहनाय उच्च- टॉर्क- व्यवस्था, सुगमगतये वेग- नियन्त्रणयुक्त-सर्वो- प्रणाली, "कोलिजन-अवेयर-मैनिपुलेशन" च इत्यादीनि सूक्ष्मकार्येषु उपयोगीकरणं कृतम् अस्ति। **'मौर्य' रोबोटस्य महत्त्वम्** -अयं केवलं छात्रनिर्मितः रोवरः न, अपितु "मेक- इन- इण्डिया" तथा "अमृत- भारतम्"- परियोजनयोः प्रतीकः अस्ति। Mars Orbiter Mission इत्यस्यानन्तरं युवा-अभियन्तॄणामयं प्रयासः भारतं वैश्विक-अन्तरिक्ष-स्पर्धायां अग्रे नेतुम् उपकरोति। दलं मार्गदर्शन-कार्यशालाभिः तथा जनजागरण-कार्यक्रमैः छात्रान् अन्तरिक्ष- प्रौद्योगिक्या सह संयोजयति।**मङ्गलग्रह-अनुसन्धानाय रोबोट-निर्माणम्**-मण्डी- आईआईटी-संस्थायाः कुलसचिवः कुमार- सम्भव- पाण्डेय- महोदयः उक्तवान् यत् मङ्गलग्रहे अनुसन्धानं कुर्वतः रोबोटस्य विषये तकनीकी- कार्यं प्रचलति। एषा परियोजना अद्यापि अनुसन्धान- अवस्थायामेव अस्ति तथा आधुनिक- प्रौद्योगिकी विकसितं क्रियते। **मण्डी- आईआईटी- संस्थाने प्रौद्योगिकी- अनुसन्धानम्**-मण्डी-आईआईटी-संस्थायाः निदेशकः लक्ष्मीधर बेहरा- महोदयः उक्तवान् यत् आधुनिक-प्रौद्योगिकी- विकासाय विविधाः परियोजनाः सञ्चालिताः सन्ति। "मौर्य"-रोबोटस्य विषये अपि गहनम् अनुसन्धानं कृतम् अस्ति।

# विश्वविद्यालयं शैक्षणिक- उत्कृष्टतायाः नवाचारस्य च केन्द्रं विधातुम् एव अस्माकं प्रमुखं लक्ष्यम्- आचार्यः ललितकुमार अवस्थी

## सरदारपटेल- विश्वविद्यालये कुलपतेः आचार्य- ललितकुमार अवस्थीमहोदयस्य जन्मदिवससमारोहस्य आयोजनम्



**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** सरदारपटेल- विश्वविद्यालय- मण्डी इत्यस्य कुलपतेः आचार्यस्य ललितकुमार अवस्थी- महोदयस्य जन्मदिवसः गरिमामये सौहार्दपूर्णे च वातावरणे परिपालितः। अस्मिन् अवसरे विश्वविद्यालय-परिवारेण तस्मै हार्दिकी शुभकामना प्रेषिता। कार्यक्रमस्य अन्तराले छात्र- कल्याण- अधिष्ठाता आचार्यः राजेशकुमारशर्मा, कार्यकारी-परीक्षा- नियन्त्रकः डॉ. सनीलठाकुरमहोदयः विश्वविद्यालय-परिवारस्य पक्षतः कुलपति-महोदयं स्मृतिचिह्नेन, शालया, हिमाचल-टोपिकया च सम्मानितवान्। अस्मिन् अवसरे उपस्थितः शिक्षकः अधिकारी च कुलप्रतिं प्रति स्वकीयां शुभेच्छां गौरवभावं च प्रकटितवान्।

अस्मिन् प्रसङ्गे कुलपतिः आचार्यः ललितकुमार अवस्थीमहोदयः विश्वविद्यालय-परिवाराय कृतज्ञतां ज्ञापयन् अवदत् यत् एषः स्नेहः आदरश्च तस्य कृते अतीव प्रेरणादायकः वर्तते। सः सर्वेषां शिक्षक- अधिकारी-कर्मचारिणां च धन्यवादं व्याहरन् उक्तवान् यत् विश्वविद्यालयस्य उन्नतिः सामूहिकप्रयासैः एव सम्भवा अस्ति। सः स्व- अनुभवान् संविभज्य विश्वविद्यालयस्य शैक्षणिकप्रगतेः, प्रशासनिकसुदृढतायाः, भाविनि-योजनानां च उपरि स्व-विचारं प्रकटीकृतवान्। सः प्रतिपादितवान् यत् सरदार-पटेल-विश्वविद्यालयं शैक्षणिक-उत्कृष्टतायाः, शोधपरक-दृष्टिकोणस्य, नवाचारस्य च केन्द्ररूपेण विकसितं करणम् एव तस्य मुख्यं ध्येयम् अस्ति। सः सर्वं प्रति आह्वानं कृतवान् यत् सर्वः समर्पण-निष्ठा-गुणवत्ताभिः सह कार्यं कुर्वन् विश्वविद्यालयं नूतन-उन्नति-शिखरं नेतुं स्व-योगदानं दद्यात्।अस्मिन् मङ्गलोत्सवे शैक्षणिक-मामलानां अधिष्ठाता डॉ. पवनचन्दः, अनुसन्धान-अधिष्ठाता डॉ. लखवीर सिंहः, योजना-विकास-अधिष्ठाता डॉ. सनील ठाकुरः, महाविद्यालय-विकास-परिषदः अधिष्ठाता डॉ. अक्षय कुमारः, छात्र-कल्याण-अधिष्ठाता प्रो. राजेशकुमारशर्मा, प्रबन्धन- अधिष्ठाता डॉ. करण गुप्ता, इतिहास-विभागाध्यक्षः डॉ. राकेशकुमार शर्मा, डॉ. रामपालः, सह-कुलसचिवः डॉ. योगेश शर्मा, डॉ. परीक्षितशर्मा च, सहायक-कुलसचिवः अभियंता. हनीत राणा, अन्ये अधिकारिणः कर्मचारिणः च उपस्थिताः आसन्।

# पञ्चायत- निर्वाचन- प्रचारस्य आरोपैः परिवृत्ता महिला-आयोगस्य अध्यक्षा, आयोगेन कुल्लू- उपायुक्तात् प्रतिवेदनं याचितम्

**हिमसंस्कृतवार्ताः- शिमला।** राज्य-निर्वाचन-आयोगेन हिमाचल- राज्य- महिला-आयोगस्य अध्यक्षा विद्यानेगी इत्यस्याः विरुद्धं पञ्चायत- निर्वाचनेषु कथित-निर्वाचन- प्रचार- विषये महत्त्वपूर्णं पदं गृहीतम्। आयोगेन सम्पूर्णविषये संज्ञानं गृहीत्वा कुल्लू-उपायुक्तात् विस्तृतं प्रतिवेदनं याचितम्। एषः उपालम्भः भाजपायाः राज्य- कार्यालय- सचिवेन प्रमोद ठाकुरेण राज्य- निर्वाचन- आयुक्ताय प्रेषितः आसीत्। उपालम्भे आरोपः कृतः यत् विद्या नेगी कुल्लू-मनाली -क्षेत्रयोः कांग्रेस- समर्थित- प्रत्याशिनां पक्षे सक्रियतया निर्वाचन-प्रचारं कुर्वती अस्ति। आरोपानुसारं सा केवलं भूमिस्तरीय- निर्वाचन- गतिविधिषु एव सम्मिलिता नासीत्, अपि तु सामाजिक- माध्यममञ्चेषु अपि प्रचार- अभियाने सक्रियतया दृश्यते स्म। भाजपया उपालम्भे उक्तं यत् राज्य-महिला-आयोगः वैधानिकी अर्ध- न्यायिक- संस्था च अस्ति, यस्मात् राजनैतिक- निष्पक्षतायाः पालनम् अपेक्ष्यते। अतः आयोगस्य अध्यक्षा यदि कस्यचित् राजनैतिक-दलस्य प्रत्याशिनः वा समर्थनार्थं प्रत्यक्षतया प्रचारं करोति, तर्हि तत् आदर्श- आचार- संहितायाः, सार्वजनिकपदस्य निष्पक्षताभावस्य विरुद्धम् अस्ति।

विषयस्य गाम्भीर्यं दृष्ट्वा राज्य-निर्वाचन-आयोगेन त्वरितं प्रशासनिक-प्रतिवेदनं याचितम्। निर्वाचन- आयोगस्य अतिरिक्त-सचिवेन सुरजीतसिंहराठौरेण अस्य पुष्टिः कृता। तेन उक्तं यत् अस्य विषये कुल्लू-उपायुक्तात् प्रतिवेदनं याचितम्। अयं विषयः उच्च- श्रेणीस्वरूपः अस्ति तथा प्रतिवेदन- प्राप्त्यनन्तरं आयोगः अग्रिमकार्यविधेः विषये निर्णयं करिष्यति।

## विपक्षेण कार्यविधेः अभ्यर्थना कृता

पञ्चायत-निर्वाचनानां मध्ये अस्य विषयस्य प्रकाशे आगमनेन प्रदेशस्य राजनीतौ आकुलता तीव्रा जाता। विपक्षेण एतत् संवैधानिक-संस्थानां निष्पक्षतया सम्बद्धं गम्भीरं प्रकरणम् इति कथयित्वा कार्यविधेः अभ्यर्थना कृता, यदा तु राजनैतिक- परिसरेषु आयोगस्य आगामिकार्यविधेः विषये चर्चाः तीव्रतां गताः।

# ओस्लो-नगरे प्रेस-स्वातन्त्र्यविषये तीक्ष्णः वादविवादः, नॉर्वे-देशस्य महिलापत्रकारस्य प्रश्नः, विदेशमन्त्रालयेन उत्तरं दत्त्वा मुखं कीलितम्



भारतस्य विदेशमन्त्रालयेन नॉर्वे-देशस्य प्रसारमाध्यमेभ्यः (प्रेस) तत्रत्येभ्यः पत्रकारेभ्यः च प्रेस-स्वातन्त्र्यस्य विषये कठोरं प्रत्युत्तरं दत्तम्। मन्त्रालयस्य स्पष्टं कथनं वर्तते यत् बहवः विदेशिनः अज्ञानिभिः गैरसरकारीसंस्थाभिः (NGOs) प्रकाशितान् भ्रामकान् प्रतिवेदनान् (reports) पठित्वा भारतविषये असमीचीनां धारणां निर्मान्ति, तेषां च भारतस्य विशालतायाः किमपि अनुमानं नास्ति।

नॉर्वे-देशस्य राजधान्यां ओस्लो-नगरे आयोजिते एकस्मिन् पत्रकारसम्मेलने भारतीय-विदेशमन्त्रालयस्य सचिवस्य (पश्चिम) सिबी जॉर्ज महोदयस्य नॉर्वे-देशस्य एकया महिलापत्रकारया हेला लेंग इत्यनया सह तीक्ष्णः वादविवादः अभवत्। यदा तया भारते मानवाधिकाराणां प्रेस-स्वातन्त्र्यस्य च विषये प्रश्नः कृतः, तदा सिबी जॉर्ज महोदयः भारतस्य विशालस्य प्रसारमाध्यम-पारिस्थितिकीतन्त्रस्य (media ecosystem) शक्तिं तस्य व्याप्तिं च प्रदर्श्य करारं प्रहारम् अकरोत्। महिलापत्रकारः सिबी जॉर्ज महोदयं अपृच्छत् यत्— "विश्वं भारते किमर्थं विश्वासं करोतु तथा च किं भारते मानवाधिकारोल्लङ्घनानि समाप्तानि भविष्यन्ति?"एतदतिरिच्य पत्रकारया एतदपि पृष्टं यत्— "किं प्रधानमन्त्री नरेन्द्रमोदी भारतीय-प्रसारमाध्यमानां कठिनानां प्रश्नानाम् उत्तराणि दातुं आरम्भं करिष्यति?"

### सिबी जॉर्ज महोदयः महिलापत्रकारस्य प्रश्नानाम् उत्तराणि यच्छन् अवदत् यत्—

"भारतं केवलं कश्चित् देशः नास्ति, अपितु इयं पञ्चसहस्रवर्षप्राचीना सभ्यता वर्तते। देशस्य परिचयः तस्य जनसंख्यया, सर्वकारेण, सम्प्रभुतया, क्षेत्रेण च भवति, जगति च भारतं एतेषु विषयेषु सुदृढस्थितौ अस्ति। भारतेन विश्वस्मै बहूनि वस्तूनि दत्तानि, कोरोनाकालः एव वा किमर्थं न स्यात्, तदापि भारतं विश्वात् पृथक् न आसीत्, अपितु येषाम् आवश्यकता आसीत्, तेषां कृते भारतं साहाय्यार्थं तस्थौ। एतदेव कारणं वर्तते यत् विश्वं भारते विश्वसिति।"

जॉर्ज महोदयः अकथयत् यत् अस्माकं समीपे एकं संविधानं वर्तते यत् जनतायाः मौलिकधिकाराणां प्रत्याभूतिं (guarantee) ददाति। भारते देशस्य महिलाभ्यः समानाः अधिकाराः सन्ति।

### केवलं दिल्लीनगरे एव २०० दूरदर्शनवाहिन्यः (TV Channels) सन्ति

सिबी जॉर्ज महोदयः नॉर्वे-देशस्य पत्रकाराय उत्तरं दत्त्वा अवदत् यत्— "किं भवती जानाति यत् अस्माकं स्थाने कति वार्ताः प्रकाश्यन्ते? अस्माकं स्थाने प्रतिदिनं सायं कति 'ब्रेकिंग न्यूज' आयान्ति। केवलं दिल्लीनगरे एव आङ्ग्ल-हिन्दी-अन्यासु च अनेकासु भाषासु न्यूनातिन्यूनं २०० दूरदर्शनवाहिन्यः (TV Channels) विद्यन्ते। जनानां भारतस्य एतावत् विशालस्तरस्य किमपि ज्ञानमेव नास्ति।"

### गैरसरकारीसंस्थानां (NGOs) भ्रामकप्रतिवेदनेषु प्रहारः

विदेशी प्रतिवेदनानां प्रामाणिकतायां प्रश्नं कुर्वन्, तेषाम् आलोचनां च कुर्वन् विदेशमन्त्रालयस्य सचिवः अवदत् यत् जनेषु अवबोधस्य (समझ) अभावः अस्ति। ते कयाचित् अज्ञातया अज्ञानिन्या च गैरसरकारीसंस्थया (NGO) प्रकाशितं एकं वा द्वौ वा वार्तां पठन्ति, ततः आगत्य एतादृशान् प्रश्नान् पृच्छन्ति।

### वयं स्वलोकतन्त्रे गर्वमनुभवाम (गर्विताः स्मः)

भारतस्य लोकतान्त्रिकमूल्यानां रेखाङ्कनं कुर्वन् सः अवदत् यत्— "१९४७ तमे वर्षे एव वयं स्वमहिलाभ्यः मतदानस्य अधिकारं दत्तवन्तः। वयं मिलित्वा स्वतन्त्रतां प्राप्तवन्तः। अहं एतादृशान् बहून् देशान् जानामि, यत्र भारतात् दशकेभ्यः पश्चात् महिलाभ्यः मतदानस्य अधिकारः प्राप्तः। वयं समानतायां मानवाधिकारेषु च विश्वस्मः। मानवाधिकारस्य एतस्मात् श्रेष्ठम् उदाहरणं किं भवितुं शक्नोति यत् जनानां समीपे स्वसर्वकारं परिवर्तयितुं मतदानं कर्तुं च अधिकारः स्यात्। भारते तथैव भवति, वयञ्च एतस्मिन् विषये अतीव गौरवान्विताः स्मः।"साभारदिव्यहिमाचलम्



## "लौकिकन्यायकोशः"
## "उभयतस्पाशरज्जुन्यायः"

एका एव रज्जुः उभयकोटिं बध्नाति चेत् ततः मोक्षः न भवति। एवम् अग्रे कूपः पृष्ठे गर्तः इति वत् यदा सर्वथा अगतिः भवति तदा तस्य वर्णनं कर्तुम् अस्य न्यायस्य प्रयोगः क्रियते।

यथा- अ) यद्यपि न बोधस्तथापि विकल्पस्तावत् प्राप्नोति। न हि तुल्यार्थानां क्वचित् समुच्चयो दृष्टः। सेयमुभयतस्पाशा रज्जुः।
सर्वदर्शनसंग्रहे बौद्धदर्शनम् {२८२}

**डा वर्षा प्रकाश टोणगांवकर**
**पुणे/ महाराष्ट्रम्**



**हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः**

## वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। प्रथमा वार्ता चीनदेशतः आगता। एकेन वैद्येन सूचितं यत् कार्यस्य अधिकायासकारणात् तस्य भारवृद्धिः जाता। तेन पञ्चाशदधिक- शत-किलोग्राम- परिमितः भारः प्राप्तः।

**नन्दिनी-** एतत् कष्टकरम्, यतः वैद्याः अपि स्वास्थ्य- समस्याभिः पीडिताः। द्वितीया वार्ता युवकानामस्ति। भारतीय-अन्तरिक्ष-संस्थायाः वैज्ञानिकेन युवकाः आदिष्टाः। नूतन-तन्त्रज्ञानाय अनुकूलं परिवर्तनं करणीयम् इति तेन उक्तम्।

**काव्या-** सत्यम्, तन्त्रज्ञानस्य ज्ञानं विना प्रगतिः न शक्या। एका प्रशासनिक-अधिकारिणी स्वजीवनस्य अनुभवं वर्णितवती अस्ति। तया जीवन- कौशलानां मानसिक-स्वास्थ्यस्य च महत्त्वम् उपदिष्टम्।

**नन्दिनी-** मानसिक-स्वास्थ्यं जीवनस्य आधारः अस्ति। अन्तिमा वार्ता अतीव रोचिका अस्ति। अधुना किशोरेभ्यः मन्द-उपभोगाः रोचन्ते। तैः अल्पतावादस्य नूतनः मार्गः अङ्गीकृतः।

**काव्या-** एषः उत्तमः विचारः अस्ति।

# केजरीवाल-सिसोदिया-सहितान् अनेकान् 'आप'-नेतृन् प्रति सूचनापत्रम् (नोटिस), न्यायाधीशस्य विरुद्धम् अपमानजनक-प्रकाशनस्य (पोस्ट) अस्ति

हिमसंस्कृतवार्ता। देहली-उच्चन्यायालयः (दिल्ली हाई कोर्ट) सामाजिक-माध्यमेषु (सोशल मीडिया) न्यायाधीशस्य विरुद्धं अपमानजनक-प्रकाशनं (अवमानना-प्रकरणं) कृत्वा तज्जनिते अवमानना-मामले केजरीवाल-महोदयं, सिसोदिया-महोदयं अन्यान् च 'आप'-पक्षस्य नेतृन् प्रति सूचनापत्रं (नोटिस) प्रेषितवान्। उच्चन्यायालयः केजरीवाल-सिसोदिया-अन्यान् 'आप'-नेतृन् च स्वपक्षं उपस्थापयितुं (उत्तरं दातुं) चतुरः सप्ताहान् यावत् समयं दत्तवान्। अग्रिमा सुनवायी अगस्त-मासस्य चतुर्थे दिनाङ्के भविष्यति।

अपरपक्षे, असम-राज्ये कथित-पारपत्र-विवादं (पासपोर्ट विवाद) अधिकृत्य राजनैतिकं वातावरणं गरमं (तीव्रं) जायमानम् अस्ति। अस्मिन्नेव समये असम-आरक्षकदलस्य (असम पुलिस) अपराधशाखया (क्राइम ब्रांच) काङ्ग्रेस-सांसदाय रणदीप सिंह सुरजेवाला-महोदयाय सम्मन-पत्रं प्रेषितम्। आरक्षकदलेन सः मई-मासस्य २३ तमे दिनाङ्के गुवाहाटी-स्थिते अपराधशाखा-आरक्षकालयं प्रति उपस्थातुं (हाजिर होने के लिए) कथितः। एषः विषयः असम-राज्यस्य मुख्यमन्त्रिणः हिमन्त बिस्वा सरमा-महोदयस्य पत्न्याः रिनिकी भुयान सरमा-वर्यायाः कथितात् पारपत्र-विवादात् सम्बद्धः इति उच्यते।

यद्यपि अद्यापि आरक्षकदलेन (पुलिस) अस्य प्रकरणस्य सर्वेषां पक्षाणां सार्वजनिकरूपेण प्रकटीकरणं न कृतम्, तथापि अन्वेषण-संस्थाः (जांच एजेंसियां) इमं विषयं गम्भीरतया पश्यन्तीः सन्ति। सूत्राणां अनुसारं, पृच्छा-काले काङ्ग्रेस-नेत्रा पवन खेड़ा-महोदयेन कथितरूपेण अस्मिन् प्रकरणे सुरजेवाला-महोदयस्य नाम उल्लिखितम् आसीत्। अस्मात् कारणात् अन्वेषण-संस्थाभिः अस्य विषयस्य कडीः (सूत्राणि) अधिकगहनतया अन्वेष्टुं आरब्धाः। अन्वेषण-संस्थाः एतदपि पश्यन्ति यत् किं गौरव गोगोई तथा रणदीप सिंह सुरजेवाला कथितरूपेण अस्मिन् विवादे कस्यचित् महतः षड्यन्त्रस्य योजनायां सम्मिलिताः आसन्। असम-आरक्षकदलस्य (पुलिस) कथनं वर्तते यत् सर्वेषां पक्षाणां सूक्ष्मतया अन्वेषणं क्रियते, तथ्यानां आधारेण च अग्रे कार्यानुष्ठानं (कार्रवाई) करिष्यते।

# अधिकमाससमीक्षा (मलमासविशेषः)

-डॉ विमलेश झा, डीएवी पब्लिक स्कूल, बरारी भागलपुर, बिहार



भारतीया संस्कृतिः विश्वस्य प्राचीना समृद्धा च संस्कृतिरीत्यभिधीयते। अस्याः संस्कृतेः मूलाधारः धर्मः, दर्शनम्, विज्ञानम्, ज्योतिषशास्त्रं च अस्ति। भारतीयजीवनपद्धत्यां कालगणनाया अत्यन्तं महत्त्वं दृश्यते। ऋतूनां परिवर्तनम्, पर्वोत्सवानां आयोजनम्, कृषिकर्म, धार्मिककार्याणि च सर्वाणि कालगणनायाः आधारेण एव सम्पद्यन्ते। भारतीयपञ्चाङ्गव्यवस्था चन्द्रसूर्ययोः गतिमवलम्ब्य निर्मिता अस्ति। अस्यां व्यवस्थायां "अधिकमासः" इति विशेषः मासः प्रचलितः अस्ति।

अधिकमासः केवलं धार्मिकदृष्ट्या न महत्त्वपूर्णः, अपितु वैज्ञानिकदृष्ट्यापि अत्यन्तं उपयोगी अस्ति। भारतीयमनीषिभिः सूर्यचन्द्रयोः गतिभेदस्य सम्यक् अध्ययनं कृत्वा अस्य मासस्य व्यवस्था कृता। आधुनिककालेऽपि अधिकमासस्य प्रासङ्गिकता वर्तते, यतः एषः मानवजीवनं संयमेन, साधनया, आत्मचिन्तनेन च सम्बद्धं करोति। अतः अधिकमासस्य धार्मिक, सामाजिक, सांस्कृतिक, वैज्ञानिक तथा आध्यात्मिकदृष्ट्या समीक्षा आवश्यकास्ति।

## अधिकमासस्य स्वरूपम्-

"अधिकमासः" इति शब्दः "अधिक" तथा "मास" इति पदद्वयस्य योगेन निर्मितः। "अधिक" इत्यस्य अर्थः अतिरिक्तः, "मास" इत्यस्य अर्थः चन्द्रमासः। यदा चन्द्रवर्षस्य सौरवर्षस्य च मध्ये कालभेदः भवति, तदा तस्य समतुल्यतास्थापनार्थम् अतिरिक्तमासः योज्यते। स एव अधिकमासः कथ्यते। उक्तं च-

**"मासानां पुरुषोत्तमोऽयं सर्वमासेषु पूजितः।**
**विष्णुप्रीतिकरो नित्यं सर्वपापप्रणाशनः"॥**

भारतीयपञ्चाङ्गानुसारं चन्द्रवर्षं प्रायः चतुःपञ्चाशदधिकत्रिशद्दिनात्मकं भवति, किन्तु सौरवर्षं पञ्चषष्ट्यधिकत्रिशतदिनात्मकं भवति। उभयोः मध्ये एकादशदिनात्मकः भेदः दृश्यते। त्रिवर्षेषु एषः भेदः प्रायः त्रयस्त्रिंशद्दिनात्मकः भवति। तदा एकः अतिरिक्तमासः स्थाप्यते। एवं अधिकमासव्यवस्था भारतीयज्योतिषशास्त्रस्य सूक्ष्मता तथा वैज्ञानिकता च प्रकाशयति।

**पौराणिकं महत्त्वम्**-पुराणेषु अधिकमासस्य विषये मनोहरः आख्यानः दृश्यते। कथ्यते यत् प्रारम्भे एषः मासः "मलमासः" इति नाम्ना तिरस्कृतः आसीत्। अन्ये मासाः तमवज्ञाय न्यूनं मन्यन्ते स्म। कोऽपि देवता अस्य स्वामी भवितुम् इच्छां न कृतवान्। दुःखितः अधिकमासः भगवन्तं विष्णुं शरणं गतः। शरणागतवत्सलः भगवान् विष्णुः तस्य करुणां श्रुत्वा तस्मै स्वनाम "पुरुषोत्तम" इति दत्तवान्। ततः आरभ्य एषः "पुरुषोत्तममासः" इति नाम्ना विख्यातः अभवत्। भगवान् उक्तवान् यत् अस्मिन् मासे कृतं जपं, तपः, दानं, व्रतं, पूजनं च बहुगुणितं फलम् दास्यति। एषा कथा अस्मान् शिक्षयति यत् यः समाजेन तिरस्कृतः भवति, ईश्वरः तमपि महान् कर्तुं शक्नोति।

**धार्मिकमहत्त्वम्**-अधिकमासः विशेषतः भगवान् विष्णोः आराधनाय समर्पितः अस्ति। अस्मिन् मासे धार्मिककार्याणां विशेषफलप्राप्तिः कथिता अस्ति। अस्मिन् मासे मन्त्रजपः, ध्यानम्, उपवासः, तपश्चर्या च विशेषपुण्यप्रदा मन्यते। भक्ताः विष्णुसहस्रनामपाठं, गीता-पारायणं, भागवतश्रवणं च कुर्वन्ति। अस्मिन् मासे अन्नदानं, वस्त्रदानं, जलदानं, गोदानं च अत्यन्तं पुण्यकरं मन्यते। निर्धनानां सहायता समाजे करुणाभावं जनयति। अस्मिन् अवसरे गङ्गायां, यमुनायां, नर्मदायां च स्नानस्य विशिष्टं महत्त्वं वर्णितम् अस्ति। अधिकमासे जनाः सात्त्विकभोजनं, ब्रह्मचर्यपालनं, क्रोधनिग्रहं, सत्यवचनं च आचरन्ति।

**वर्जितकार्याणि**--भारतीयपरम्परानुसारम् अधिकमासे कतिपयानि मांगलिककार्याणि निषिद्धानि मन्यन्ते। यथा- विवाहः, गृहप्रवेशः, यज्ञोपवीतसंस्कारः,मुण्डनसंस्कारः, नवीनगृहस्य शुभारम्भः आदीनि। एतेषां निषेधस्य कारणं मनः संयमेन आध्यात्मिकतायां केन्द्रितं भवेत् इति।

**सामाजिकमहत्त्वम्**-अधिकमासः समाजे दान, सेवा, सहानुभूति तथा परोपकारभावं वर्धयति। अस्मिन् समये जनाः निर्धनेभ्यः भोजनं वितरन्ति, वस्त्रदानं कुर्वन्ति, गौसेवां कुर्वन्ति, वृक्षारोपणं च कुर्वन्ति। धार्मिकसत्सङ्गाः, भागवतसप्ताहाः, कीर्तनकार्यक्रमाः च समाजे आध्यात्मिकवातावरणं निर्मान्ति। एतेन समाजे सद्भावना, एकता, नैतिकता च वर्धते।

**मनोवैज्ञानिकमहत्त्वम्**-सम्प्रति यत्र मानवः विविधसमस्यावशात् मानसिकवेदना, चिन्तया, स्पर्धया च पीडितः अस्ति तत्र अधिकमासः आत्मचिन्तनस्य अवसरं ददाति। यदा मनुष्यः भौतिकसुखेभ्यः निवृत्य ध्यानं, जपं, साधनां च करोति, तदा तस्य मानसिकशान्तिः वर्धते। उपवासः, संयमः, ध्यानम् च शरीरस्य मनसश्च शुद्धिं कुर्वन्ति। अतः अधिकमासः केवलं धार्मिकः न, अपितु मानसिकस्वास्थ्यस्य कृते अपि हितकारी अस्ति।

**वैज्ञानिकदृष्ट्या समीक्षा**-अधिकमासव्यवस्था भारतीयखगोलशास्त्रस्य अद्भुतम् उदाहरणम् अस्ति। सूर्यस्य चन्द्रस्य च गतिभेदं दृष्ट्वा भारतीयज्योतिषाचार्यैः अस्य मासस्य निर्माणं कृतम्। आधुनिकविज्ञानमपि स्वीकरोति यत् चन्द्रवर्षस्य सौरवर्षस्य च मध्ये कालभेदः भवति। पाश्चात्येषु "लीपवर्ष" व्यवस्था अस्ति, किन्तु भारते प्राचीनकालादेव अधिकमासव्यवस्था प्रचलिता आसीत्। एतेन ज्ञायते यत् भारतीयज्योतिषशास्त्रं केवलं आस्था न, अपि तु विज्ञानसम्मतं शास्त्रमपि अस्ति।

**आर्थिकप्रभावः**-अधिकमासे विवाहादीनि मांगलिककार्याणि न भवन्ति। अतः विवाहव्यवसायः, आभूषणव्यवसायः, मण्डपव्यवस्था, सज्जाकार्यं च किञ्चित् प्रभावितं भवति। परन्तु तीर्थयात्रा, पूजासामग्रीव्यवसायः, धार्मिकआयोजनानि च वर्धन्ते। अतः धार्मिकक्षेत्रे आर्थिकगतिविधयः अधिकाः भवन्ति।

## आधुनिकयुगे अधिकमासस्य प्रासङ्गिकता

आधुनिकजीवनं भौतिकतायाः, उपभोक्तृसंस्कृतेः, स्पर्धायाः च प्रभावेन प्रभावितम् अस्ति। जनाः आध्यात्मिकतायाः दूरं गच्छन्तः सन्ति। एतादृशे काले अधिकमासः भारतीयमूल्यानां स्मरणं कारयति। अधिकमासः मनुष्यं संयमम्, सदाचारम्, आत्मनिग्रहम्, ईश्वरभक्तिं च शिक्षयति। यद्यपि एषः मासः केवलं कर्मकाण्डरूपेण न स्वीक्रियते, तथापि आत्मविकासस्य साधनरूपेण स्वीक्रियते।

**अधिकमासस्य सकारात्मकपक्षाः-**

१. आध्यात्मिकजागरणम्- एषः मासः जनान् ईश्वरभक्तये प्रेरयति। अस्मिन् अवसरे जनाः नाम स्मरणं कुर्युः तद्यथा-

**"कृष्णाय वासुदेवाय हरये परमात्मने।**
**प्रणतक्लेशनाशाय गोविन्दाय नमो नमः"॥**

२. सामाजिकसेवा- दानसेवाभावस्य विकासं करोति।

३. मानसिकशान्तिः- ध्यानोपवासादिभिः मानसिकसन्तुलनं भवति।

४. संस्कृतिरक्षणम्- भारतीयपरम्पराः जीविताः भवन्ति।

५. वैज्ञानिकता- भारतीयकालगणनायाः सूक्ष्मतां प्रकाशयति।

**अधिकमासस्य आलोचनात्मकपक्षाः-**

१. अन्धविश्वासः- केचन जनाः अधिकमासस्य नाम्ना भयप्रचारं कुर्वन्ति।

२. कर्मकाण्डप्रधानता- क्वचित् वास्तविकभक्तेः स्थाने केवलं बाह्याडम्बरः दृश्यते।

३. आर्थिकप्रभावः- मांगलिककार्यनिषेधेन कतिपये व्यवसायाः प्रभाविताः भवन्ति।

४. शोषणप्रवृत्तिः- केचन तथाकथितधर्माचार्याः जनानां श्रद्धायाः दुरुपयोगं कुर्वन्ति।

**समाधानम्**-अधिकमासस्य वास्तविकमहत्त्वं समाजे प्रचारयितुं आवश्यकम् अस्ति।धार्मिकशिक्षायाः प्रसारः भवेत्। अत्र सर्वैः वैज्ञानिकदृष्टिकोणः स्वीकर्तव्यः। अत्र अन्धविश्वासस्य परित्यागः आवश्यकः अस्ति। अस्माभिः सेवा, साधना, सदाचार इत्यादीनां प्रोत्साहनं कर्तव्यम्। यदि अधिकमासः आत्मशुद्धेः, समाजसेवायाः, पर्यावरणसंरक्षणस्य च माध्यमरूपेण स्वीक्रियते, तर्हि एषः सम्पूर्णमानवसमाजस्य कल्याणाय उपयुज्येत।

अत्र सारांशत्वेन वयं वक्तुं शक्नुमो यत् अधिकमासः भारतीयसंस्कृतेः, धर्मस्य, विज्ञानस्य च अद्भुतः समन्वयः अस्ति। एषः केवलं अतिरिक्तमासः न, अपितु आत्मचिन्तनस्य, संयमस्य, साधनायाः, सेवायाः च पवित्रकालः अस्ति। भारतीयमनीषिभिः निर्मिता एषा व्यवस्था तेषां वैज्ञानिकप्रतिभायाः प्रमाणम् अस्ति। धार्मिकदृष्ट्या एषः भगवान् विष्णोः "पुरुषोत्तममासः" अस्ति, वैज्ञानिकदृष्ट्या च कालसन्तुलनस्य साधनं विद्यते।

अद्य आवश्यकता अस्ति यत् वयं अधिकमासं केवलं कर्मकाण्डरूपेण न पश्येम, अपितु जीवनपरिष्कारस्य अवसररूपेण स्वीकुर्याम। यदि मानवः अस्मिन् मासे संयमं, सदाचारं, दानं, भक्तिं च आचरति, तर्हि तस्य जीवनं शान्तिमयं, संतुलितं, सफलं च भविष्यति। जनाः अस्मिन् मासे अधिकाधिकं ईश्वरनामसंकीर्तनं कुर्युः।

अतः अधिकमासः भारतीयपरम्परायाः महानता, आध्यात्मिकता, वैज्ञानिकता च उज्ज्वलरूपेण प्रकाशयति। अन्ते च-

**"अधिके पुरुषोत्तममासे जपदानादिकं शुभम्।**
**कोटिगुणफलं प्रोक्तं विष्णुना पुरुषोत्तमे॥"**
**"तीर्थानि सरितः सर्वाः अधिके मासि संस्थिताः। हरिस्मरणमात्रेण पावनं जायते नरः॥"** इत्यलम्।।